## स्थानान्तगोशालखरशालाच्च । (३५/१४१०)

[1]स्थानान्तात् प्रातिपदिकात् गोशालशब्दात् खरशालशब्दात् च जातार्थे[2] प्रत्ययस्य लुग् भवति । गोस्थाने जातः गोस्थानः । [3]अश्वस्थानः । गोशालः । खरशालः ॥

## वत्सशालाभिजिदश्वयुक्छतभिषजो वा । (३६/१४११)

वत्सशालादिभ्यः परस्य [4]जातार्थे प्रत्ययस्य लुग् वा भवति । वत्सशालायां जातः वत्सशालः, [5]वात्सशालः । अभिजित्, [6]आभिजितः । अश्वयुक्, आश्वयुजः । शतभिषक्, शातभिषजः । बहुलग्रहणस्य अयं प्रपञ्चः ॥

## नक्षत्रेभ्यो बहुलम् । (३७/१४१२)

[7]नक्षत्रेभ्यः [8]उत्तरस्य जातार्थे प्रत्ययस्य बहुलं लुग् भवति । रोहिणः, रौहिणः । [9]मृगशिराः, मार्गशीर्षः[10] ॥

## कृतलब्धक्रीतकुशलाः । (३८/१४१३)

तत्र इत्येव[11] । सप्तमीसमर्थात् कृतादिष्वर्थेषु यथाविहितं प्रत्ययः भवति । स्रुघ्ने कृतो वा लब्धो वा क्रीतो वा कुशलो वा स्रौघ्नः । [12]माथुरः । [13]राष्ट्रियः ।

ननु च यद् [14]यत्र कृतं जातमपि[15] तत्र भवति, यच्च यत्र क्रीतं लब्धमपि तत्रैव भवति किमर्थं भेदेनोपादानं क्रियते, [16]शब्दार्थस्याभिन्नत्वात् ? वस्तुमात्रेण क्रीतं लब्धं भवति, शब्दार्थस्तु भिद्यते एव ॥

## प्रायभवः । (३९/१४१४)

तत्र इत्येव[17] । सप्तमीसमर्थात् ङ्याप्प्रातिपदिकात् प्रायभवः इत्येतस्मिन् [18]विषये [19]यथाविहितं प्रत्ययो भवति । प्रायशब्दः साकल्यस्य किंचिन्न्यूनतामाह । स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः । माथुरः । राष्ट्रियः । प्रायभवग्रहणमनर्थकं तत्र भवेन [20]कृतत्वात् (म. भा. २.३०८) । अनित्यभवः प्रायभवः इति चेद्, मुक्तसंशयेन तुल्यम् (म. भा. २.३०८) ॥

---

1. स्थानात् क. 2. छप्रत्ययस्य ह. 3. नास्ति फ. 4. जातार्थप्रत्ययस्य फ. ह. 5. वात्सशालः नास्ति ब. फ. 6. अभिजितः ब. 7. नक्षत्रशब्देभ्यः ब. फ. इ. 8. उत्पन्नस्य जातार्थप्रत्ययस्य फ. 9. मृगशिरः मार्गशिरसः मृगशीर्षः मार्गशीर्षः क. 10. ये च तद्धिते इति चकारात् अणि शिरसः शीर्षभावः इत्यधिकम् ब, पूर्णो जातार्थः इत्यधिकम् फ. 11. एव नास्ति इ. फ. 12. माथुरः ब. ड. ह. 13. राष्ट्रीयः ह, खड्गे कुशलः खाड्गः योधः, राष्ट्रे कृतं राष्ट्रियं इत्यधिकम् फ. 14. यत्र नास्ति फ. 15. तत् इत्यधिकम् क. 16. शब्दार्थभिन्नत्वात् ह. 17. एव नास्ति फ. 18. अर्थे ब. क. ड. इ. फ. ह. 19. यथाविहितप्रत्ययो भवति ब. 20. एव इत्यधिकम् ह.